ॐ

॥ श्री गुरुभ्यो नमः ॥

शास्त्ररत्नाकर श्री पोलकं रामशास्त्रिणा प्रणीतं

# श्री हरदत्ताचार्यवर्य पञ्चरत्नम्

श्रीमत्कंसपुरे पुराऽऽविरभवत् श्रीवैष्णवानां कुले
यद्रूपेण सुदर्शनोप्यमिधया विष्णुश्शिवाराधकः ।
लोके बोधयितुं श्रुतीरित शिवोत्कर्षम् जगत्क्षेमकृत्
सोऽयं श्रीहरदत्तनामगुरुराट् तन्वीत भद्राणि नः ॥ १ ॥

शैवानां पदपांसुमिश्शिशुदशो यः पांसुकेलिम् व्यधात्
स्वप्ने चेश्वरदत्तपायसमथो बुद्धश्च यो भुक्तवान् |
यस्येशो हरदत्तनाममहितां विद्यां च साक्षाद्ददौ
सोऽयं श्रीहरदत्तनाम गुरुराट् तन्बीत भद्राणि नः ॥ २ ॥

ततायः कृतषीठमध्यनिलयो विष्णोः पुरचालये
शंभूत्कर्षमबाध्य युक्तिततिमिः संस्थाप्य शैवान् व्यधात् ।
पित्रादीन् शिवमन्त्रचिन्तनपरान् रुद्राक्षभस्मामान्वितान्
सोऽयं श्रीहरहत्तनाम गुरुराट् तन्वीत भद्राणि नः ॥ ३ ॥

पद्यर्य : श्रुतिमुक्ति गुंभनवतीम् मालां च साश्शतैः
निर्मायाखिल वेदतन्त्रगगिरी तात्पर्य संग्राहकैः ।
शेषित्वं नमसोऽध्वरस्य च शिवस्याचष्टचान्यान् गुणान्
सोऽयं श्रीहरदत्तनाम गुरुराट् तन्वीत भद्राणि नः ॥ ४ ॥

कावेर्युत्तरतीरगे सुविदिते श्री चोळदेशस्थिते
क्षेत्रे कंसपुरामिषे निवसतः सायुज्यमग्नीशितुः ।
प्रायान्माकर शुक्लूपश्चमतिथौ यो भक्तबृन्दान्वितः
सोऽयं श्रीहरदचानाम गुरुराट् तन्वीत भद्राणि नः ॥ ५ ॥

ब्रह्मश्री के. बालसुब्रह्मण्य शास्त्रिणा विरचितम्

# ॥ श्री हरदत्तगुरुराज दशकम् ॥

श्रीमत्कंसपुरे सुधीविलसिते श्री वैष्णवानां कुले
श्रीमत्काश्यपगोत्र आविरभवत् श्री वासुदेवात्मजः ।
शैवं स्थापयितुं श्रुतिस्मृतिपुराणन्याय सञ्चारणैः
यः सोऽयं हरदत्त शैवगुरुराट् देयादभीष्टानि नः ॥ १ ॥

भस्मोद्धूलन ईशनेत्रवहने पञ्चाक्षरीसञ्जपे
लिङ्गाराधन एव बुद्धिमभजत् पित्रानुशिष्टोऽपि यः ।
भुक्तं शैषशिशोर्न देयमिति पित्राज्ञापरो निर्गतः
यः सोऽयं हरदत्तशैवगुरुराट् देयादभीष्टानि नः ॥ २ ॥

विष्णुब्रह्मविमृग्यमाणपदशीर्षाशेषभूताधिप
पित्रा त्यक्तमिमं बालं करुणया प्रेक्षस्व सोमेश्वर ।
इत्यार्तं शिवपूजने कृतधियं स्वेनैव नाम्नाङ्कितम्
चक्रे यं हरदत्तशैवगुरुराट् देयादमीष्टानि नः ॥ ३ ॥

तप्तायस्त्रिपदे महोपनिषदुक्तोपासनोपास्यतां
गायत्रीप्रतिपाद्यतां क्रतुनमश्शेोषित्वमुच्चैर्जगौ ।
पाड्गुण्यं परशैवलक्षणमित्ति श्री वैष्णवानां पुरः
यः सोऽयं हरदत्तशवगुरुराष्ट्र देयादभीष्टानि नः ॥ ४ ॥

पाण्ड्यराटूशिवलिङ्गभूपतिगुरुर्ब्राह्मण मार्गेण सद्
वाधूलान्वयसुप्रतीकतनया मुद्रा मेजे रतिम् ।
पुत्रानष्ट सुशीलकन्यकारी प्राप्यार्थवान् गृह्यभूत्
यः सोऽयं हरदत्तशैवगुरुराट् देयादभीष्टानि नः ॥ ५ ॥ :

तृष्णापीडितकुक्कुराय महते शङ्खस्थनीरन्ददौ
भूपालप्रहित हुतं हुतवहे क्षौमं ददर्शश्वरे ।
गोहत्या विनिमोचकं शिवमनुं दूर्वाद नन्दीमुखात्
यः प्रत्याययदेष शैवगुरुराट् देयादभीष्टानि नः ॥ ६ ॥

भूपप्रेषितशालिभूतविलयो ब्रीह्यादगोवारणात्
पत्नीखगहतश्वदेवभवनप्राप्तिर्विभूतेर्बलात् ।
ईशादिष्टजपः श्वगोहननयोरेकान्त निरकः
एवं यः समदर्शयद्भुवि नृणां देयादभीष्टानि नः ॥ ७ ॥

कावेरीसिकतासु लिंगमतिकृञ्चण्डालपादाश्रितः
सप्तक्षेत्रपदातिचोलनृपतेः कैलाससंप्रायकः ।
अनीशस्य रथोत्सवे सुतगणो यस्यानुभावादलं
कारन्प्राप सुगोष्पदात् शिवगुरुर्देयादभीष्टानि नः ॥ ८ ॥

पुष्ये लिङ्गसमीक्षणं ह्यघहरं पञ्चाक्षरो मन्त्रराट्
मार्गेबन्धुरुमापतिः ऋणहरो जन्मान्तरे ह्यात्मभूः ।
पङ्गुं प्रापयते सदाशिवपदं गंगाधरं भक्तिरित्याद्यं
यः प्रकटीचकार गुरुराट् देयादभीष्टानि नः ॥ ९ ॥

सप्तस्थानसुयात्रिकः प्रतिदिनं चाग्नीशसंसेवकः
सर्वैग्रम जनैर्विमानवरमारुह्याप कैलासकम् ।
झुण्डादण्डसमुद्भूतां प्रतिदिनं संमोदकाराधिकाम्
प्राप्तां पूर्वमपश्यदेष गुरुराष्ट्र देयादभीष्टानि नः ॥ १० ॥

कै बा शि रचितमेतत् दशकं गुरुराजवर्यस्य ।
दशमीन्दशां व्यपोछेत् सौख्यं दद्यात् प्रवक्तृणाम् ॥ ११ ॥

दशक्तिकुसुममाला श्रुति सूक्तिमालाविवरणावसरे ।
अर्पिता गुरुचरणयोः जीयादम्लान गन्धपत्राड्या ॥ १२ ॥

॥ शुभम् ॥

ॐ

# श्रुति सूक्ति माला

यस्मै नमो भवति यस्य गुणाः समग्राः
नारायणोपनिपदा यदुपासनोक्ता।
यो नः प्रचोदयति बुद्धिम धिक्रतौ यः
तं त्वामनन्यगतिरीश्वर संश्रयामि ॥ १ ॥

वेदेषु वा तदनुयायिषु वा विचार्य
तन्त्रेषु वाक्यमखिलं प्रतिपादकन्ते।
तात्पर्य सङ्ग्रहमहं विदधे महेश !
मह्यं प्रसीद नय मामृजुना पथा त्वम् ॥ २ ॥

मन्त्रार्थवादविधिभिर्वहुधा विभक्तो
यश्शब्द राशिरनपेक्षतया प्रमाणम्।
सोयं विमत्सरविमृष्टपदार्थतत्वो
वेदः प्रकाशयति केवलमीश्वरं त्वाम् ॥ ३ ॥

शब्दोयमीश्वर इति श्रुतिगोचरस्सन्
आनीलकण्ठमवर्तसिवचन्द्र लेखम्।
त्वामेव बोधयति नाथ ! निजार्थपोषात्
अन्यं पुनः प्रकरणादि निपीडनेन ॥ ४ ॥

शब्दस्त वायमभिधानमनन्यशब्दो
नैघण्डुका शिशवपदा दिवदेनमाहुः।
वस्तु स्वभावकृतमेव तु पूज्यभावं
ब्रूते महेश्वर ! महान्परमञ्च शब्दः ॥ ५ ॥

यस्योपसर्जनमसौ परमो महान्वा
शब्दस्तदर्थममिधातुमलं प्रकृष्टम्।
शब्देन पूज्यवचनेन समस्यमानः
पूजां ब्रवीति यदि शब्दविदः प्रमाणम् ॥ ६ ॥

नानीश्वरं भवितुमर्हति विश्वमेतत्
बडीश्वरच नितरामयथाप्रमाणम् ।
तल्लोक वेद विदितेश्वरवर्जनेन
कोयं भ्रमः कतिचिदीश्वरमन्यमाहुः ॥ ७ ॥

विश्वं निरीश्वरमिदं जगदाह साङ्ख्यो
योगश्च सेश्वरमुभावनुवादिनोऽन्ये ।
नत्वेव संभवति सेश्वरतां ब्रुवाण :
पद्मासनादिभिरनीश्वरशब्दवाच्यैः ॥ ८ ॥

ऐश्वर्यमग्रचमनुपाधिनिबन्धनन्ते
यद्भूतनाथ ! नमसामपि पात्रमेकम् ।
तत्प्रायशश्श्रुतिषु दुर्लभमेव वाक्यं
मुक्त्या नमो भवति यत्र भवत्प्रसङ्गम् ॥ ९ ॥

देव ! त्वदेकविषयाणि नमांसि पुंसां
यस्मै नमश्श्रुतिबलादवधारयामः ।
देवान्तरेषु विहितान्यपि तान्यमूनि
स्रोतांसि सागर इव त्वयि संपतन्ति ॥ १० ॥

यस्मै नमश्श्रुतिरन्म नमस्खिनन्त्वां
एका नियोजनमुवाच पशोः कपर्दिन् !
अन्या च दिव्य शिशुमाराशिरो भवन्तं
शक्यन्तदित्थमुभयेन नमो विधातुम् ॥ ११ ॥

श्रुत्योर्द्वयोरपि नमस्विनमुच्यमानं
त्वामेव तन्तमनुसन्दधतः प्रदेशम् ।
शंसन्ति मन्दमतयो s पि किमापतन्तं
मध्यन्दिने हि सवितारमपन्हुवीरन् ॥ १२ ॥

कर्मैव शूलधर शलगवन्त्वदीयं
मन्त्रा भवन्तमखिलाः प्रतिपादयन्ति ।
त्वामन्तरेण नमसा कृतलक्षणाय
कस्मै पशु नियुनजानि नियोजय त्वम् ॥ १३ ॥

अङ्गान्तरेषु विबुधान्तरसंस्तुतेषु
यश्शिंशुमारशिरसः परिशिष्यसे त्वम् ।
तस्मै नमो भवितुमीश्वर सांप्रतन्ते
देवान्तराय न कथञ्चिदनीश्वराय ॥ १४ ॥

या बज्रिणी भवति शङ्कर शङ्खनी या
मुद्रा च या कमलिनी भरतोपदिष्टा ।
ताभिर्भवन्त्यमिनया विबुधान्तराणां
मौळिस्पृशा करपुटाञ्जलिमुद्रया ते ॥ १५ ॥

दत्तन्नमः किमपिशुश्रुम देवताभ्यः
त्वामन्तरेण नमसामवसानभूमिम् |
तास्तद्ग्रहीतुमनलन्न हि कश्चिदीष्टे
चोरोपनीतमिव धारयितुं किरीटम् ॥ १६ ॥

तस्मै नमो भवतु यत्र निषीदसीति
सर्वं नमस्यमनया तु दिशा महेश !
अप्योषधीः प्रति नमो वयमामनामो
देहीव देहमधितिष्ठसि येन सर्वम् ॥ १७ ॥

सर्वम् त्वया जगदघिष्ठितमेव मत्वा
श्वान श्रुतौ नमसिताः पतयश्च तेषाम् ।
लोके पुनस्तव महेश्वर ! भक्तियोगात्
आरोपिता अपि वयं बहुमानपात्रम् ॥ १८ ॥

द्वेधा नमो विमृशतः प्रतिभाति लोके
वेदेषु वा विषमलोचन ! नान्यरूपम् |
यत्तन्नमस्त्वयि तदीश्वरताप्रयुक्तं
त्वत्सन्निकर्षविहितं यदनीश्वरेषु ।। १ ९ ।।

त्वत्सन्निकर्षकृत एव नमः प्रयोगः
प्रायो बसीयसि यवीयसि दृश्यमानः ।
श्रेष्ठप्रयुक्त इति कल्पयितुं न शक्यम्
अश्रेयसामपि नमांसि निदर्शितानि ॥ २० ॥

श्रेष्ठ्यप्रयुक्तमषि नाम नमस्त्वदीयं
श्रेष्ठोऽसि यः ऋतुभुजां पतिरनियानाम् ।
श्रेष्ठश्रुतोसि भगवन्नविशेषतस्त्वं
मन्त्रेषु कृच्छ्रपठितेषु च सामगानाम् ॥ २१ ॥

देवान्तरस्सह नमस्तुतिहृतयस्ते
तोषाय नालमलमेव विपर्ययाय ।
पुत्रार्थिनवरुविधौ सह चन्द्रमौळे !
सोमेन हूतमनुशुश्रम रुद्रमझिम् ॥ २२ ॥

अनिं प्रकृत्य खलु रुद्रपदं प्रयुङ्क्ते
तद्ब्राह्मणं भवति यत्र तयोस्सहूतिः ।
आह्वानमत्र भवतः पृथगेव दृष्टं
यत्प्रातरग्निमिति सूक्तविदः पठन्ति ॥ २३ ॥

अग्न्यादिभिस्तव महेश्वर ! इतिशङ्का
माभूदिति प्रकृतमप्यनुषङ्गोग्यम् ।
मन्त्रः क्रियापदमपास्थ पदान्तरेण
त्वमाह्वयन्नुतपदेन मिनत्ति रीतिम् ॥ २४ ॥

न्यासीकृतं वसु बलादमरैरवाप्तुं
अन्वागतो रुदितवानिति रुद्रमग्निम् ।
रुद्रस्त्वदुद्भवतया मरुतो गणान्वा
रुद्रावणेन च भवन्तमवैमि रुद्रम् ॥ २५ ॥

यज्ञेऽपि रुद्रपदमारुणकेतुकोक्तं
तच्छब्दमीश्वर ! तदीयमपि स्मरन्ति ।
यत्तत्प्रदेशगतरुद्रपदावकाशे
यज्ञस्य शब्दमनुशुश्रुम सामगेभ्यः ॥ २६ ॥

सन्ताप्य रोंदयितरि प्रसभं जनानां
आहुर्ज्वरेऽपि विषमेक्षण | रुद्रशब्दम् ।
रौद्रश्च तत्प्रकृतिकं प्रतिरूपकं वा
शब्दान्तरं भवति वायसशब्दकल्पम् ॥ २७ ॥

सन्त्येव तद्धितपदप्रतिरूपकाणि
भूरीणि भागवतसात्वतसन्निभानि |
स्यात्ताहगेव भगवानिति शब्दरूपं
षाड्गुण्यहेतुकमपि त्वदुपैति नान्यम् ॥ २८ ॥

ऐश्वर्यमग्रथमनुपाधिमती च लक्ष्मीः
ज्ञानं च वीर्ययशसी च विरागता च ।
एते गुणाः षडपि ते भगसंज्ञयोक्ताः
सन्तीत्यनेन भगवन् ! भगवानसि त्वम् ॥ २९ ॥

ऐश्वर्यमीश्वरपदश्रुतिरुग्रशब्दो
वीर्यम् यशश्शिवपदं च तवाभिधत्ते ।
सर्वज्ञकामरिपुशब्दसमर्थितौ च
सार्वज्ञरागविरहौ भवतः पुरारे । ॥ ३० ॥

अर्थरिश्रया शिव ! न कोऽपि विरज्यस्ते
श्रेष्ठस्तया त्वमसि दाशतयीभिरुक्तः ।
लब्धुं श्रियं जनिम चारुविचित्ररूप
अभ्यचितं तत्र मरुद्भिरुदाहन्ति ॥ ३१ ॥

सत्यं क्षमा धृतिराधेष्ठितिरात्मबोधः
सृष्टिर्विरागतपसी मतिरीश्वरत्वम् ।
नत्वद्वियन्ति न कदाचिदपैति धर्मः
किन्तन्नयद्भवति ते गुणसंमतेषु ॥ ३२ ॥

नैवेश्वरान्नयशसा महतो न वीरान्
न श्रीमतः क्षितिपतीनपि सार्वभौमान् ।
अन्यादृशानपि महेश्वर ! वीतरागांन्
प्रज्ञावतो भगवतः प्रवदन्ति वृद्धाः ॥ ३३ ॥

आथर्वाणा मदनशासन ! निब्रुवागा :
नामानि नाम भगवानिति ते निराहुः ।
अत्याश्रमोपनिषदाह भगेश्वरं त्वां
नैघण्टुकाच भगवन्तमुशन्ति पूज्यम् ॥ ३४ ॥

पूजा तमुष्टुहिवता विहिता महेश
मन्त्रेण वाङ्मनसकाय निबन्धना ते ।
सर्वामिरप्युपनिषद्भिरुपासनोक्ता
नारायणोपनिषदं परिभावयामः ॥ ३५ ॥

वाक्यं यदाह दहरान्तरुपासनन्ते
यद्वा समर्पयति रूपविशेषमस्मै ।
अन्तर्गतैरपि तदौपयिकाभिधेयैः
भाव्यं वचोभिरिति वाक्यविदां प्रवादः ॥ ३६ ॥

नारायणस्य यदुपास्यतयाऽभिधानम्
    यद्वा फलन्तदिह नोपलमे कथञ्चित् ।
उत्पत्तिशिष्टभवदन्वयमन्यगामि
    शक्यं महेश्वर ! न कर्तुमुपासनन्ते ॥ ३७ ॥

नासाबुपासनमुपास्यकथैव दूरे
    तस्मादुपासकतया परिशेषसिद्धिः ।
अन्तर्व्यवस्थितगिरा परमात्मनस्ते
    शब्दाते ऽ पि विहितं तदुपासकत्वम् ॥ ३८ ॥

यस्य स्थितोसि हृदये परमस्त्वमात्मा
    युक्तन्न तस्य परमात्मतयाऽभिधानम् ।
स्वेन स्वयं मनसि वह्निशिखान्तराळे
    तिष्टन्नुपास्य इति हास्यपदं न कस्य ॥ ३९ ॥

नारायणस्य हृदयं सुषिरं महाग्निः
    अग्नेशिखा च परमात्मपदं यदुक्तम् ।
सर्वोप्युपासनविधेरयमर्थवादः
    श्रद्धा विशिष्ट पुरुषाचरणा द्विधेये ॥ ४० ॥

नारायणप्रकरणे हृदयं यदुक्तं
    तस्यैव तद्भवितुमर्हति नापरेषाम् ।
दृष्टं यतिप्रकरणे यतिमिर्गृहीत
    पूर्वानुवाकविहितं यदुपासनन्ते ॥ ४१ ॥

ब्रह्मोच्यते परमसौ परभं च तत्वं
    ज्योतिः परं च परमेश्वर ! पद्मनाभः ।
त्वद्भावनैकरसिकस्त्वदनन्यभावात्
    मन्त्री यथा गरुडभावनया गरुत्मान् ॥ ४२ ॥

गीतासु योगजविभूतिविभावनाय
नारायणश्शिवपदं प्रतिवाचमूचे ।
योगन्निशायय महेश्वरगोचरं मे
दिव्यं ददामि तव चक्षुरिति प्रसन्नः ॥ ४३ ॥

त्वामन्तरेण न कथंचिदुपासनीयं
अन्यं ब्रवीति सशिवस्तुतिरन्तकारे !
यद्ब्रह्मशब्दसमभिव्यवहारयोगात्
संहारकारिणिहरे शिवशब्दमाहुः ॥ ४४ ॥

विश्वाधिकस्त्वमसि विश्वमयं मुरारिः
यज्ञेश्वरस्त्वमसि यज्ञममुं गृणन्ति ।
आद्या जगत्प्रकृतिरेषभवान्निमित्तम्
आतः कथन्नु भगवन्युयोरभेदः ॥ ४५ ॥

विश्वात्मनस्तुतिषु विश्वपतित्ववादः
सङ्गच्छते स्तुतितयैव रथाङ्गपाणेः ।
विश्वस्यपत्युरथ विश्वतयाभिधानं
नालं गुणाय गुणगृह्यनिकर्षहेतुः ॥ ४६ ॥

विश्वं महेश्वर ! भवानधितिष्टतीति
विश्वात्मताम्रपचरन्ति यदागमास्ते ।
तत्पण्डिता बिदितवेदरहस्यशीला :
जानन्ति मन्दमतयस्तु तदेव सत्यम् ॥ ४७ ॥

तुभ्यं नमो विद्धदीश्वर ! तन्तमर्थम्
आतिष्ठते सकलकर्मसु विश्वदर्शी |
सर्वानुवाद मिद मुक्तसमर्थनाय
कात्यायनो मुनिरुदाहरति स्म गृह्ये ॥ ४८ ॥

स्थानं यदान्तरभुपास्तिरुपासको वा
या सा परा परतया विविधा विभूतिः ।
यद्वा पुनर्विपमनेत्रमुपासितव्यं
नारायणोपनिषदाह तदत्र सर्वम् ॥ ४९ ॥

यज्ञात्मना स्वयमसावृषिणोपदिष्टा
नारायणेन भवतः प्रतिपादयित्री ।
सूक्तं यथा पुरुषदैवतमन्तकारे
नारायणार्षमिति तद्व्यपदिष्टमाहुः ॥ ५० ॥

एषा महोपनिषदाह हिरण्यगर्भम्
जातं त्वदेव भगवन् प्रथमं सुराणाम् ।
नारायणाभिजनमे नमथापि मन्दाः
शंसन्ति तत्र भवतः कतिचित्प्रसूतिम् ॥ ५१ ॥

मध्ये ललाटमरविन्दभुवः क्षणेन
दृष्टो भवानिति क एवं निकर्षवादः ।
योगादिरूढमनसश्शिव ! मादृशोऽपि
स्थानेषु पञ्चसु न कस्य तवोपलंभः ॥ ५२ ॥

ब्रह्माणि पञ्चतन वश्शिव मन्त्ररूपा
जीवातवः पशुपते ! शिवसंहितानाम् ।
रुद्रेषु पुण्यमिव पञ्चकमक्षराणां
अस्यां महोपनिषदीति महत्ववादः ॥ ५३ ॥

विद्येश्वरस्त्यससि भूतपतिस्त्वमेकः
स्त्रष्टुर्भवानधिपतिस्सृजति प्रपञ्चम् ।
यद् ब्राह्मणान्प्रति तव श्रुतमाधिपत्ये
तद्ब्रह्मणो मम सदाशिव जन्मलाभः ॥ ५४ ॥

विद्येश्वरत्वपुनरुक्ततया न वाच्यं
बेदाधिपत्यमयमेव महेश | वेदः ।
विद्या भवन्ति शतशः प्रविभज्यमानाः
स्रोतांसि किन्न सरितेव पृथक् कृतानि ॥ ५५ ॥

आदित्यमृग्यजुषसामनिधानकोशे
बिम्बे निविष्टमघितिष्ठति पूरुषो यः ।
एषा तमेष इति साभिनया भवन्तं
भृताधिपत्यवचनेन शशंस नाम्ना ॥ ५६ ॥

उक्तो हिरण्यपतिरेष हिरण्यबाहु
रुक्तोऽम्बिकापतिरुमापतिरेष उक्तः ।
आहुर्भवन्तमधिदैवतमुष्णरश्मेः
आतस्तदर्चनविधौ भगवन्नभिज्ञाः ॥ ५७ ॥

यो मण्डलं तपति यश्च तदन्तरात्मा
या चानयोर्भवति भूतपते ! विभूतिः ।
जानान एतदपि यत्फलमश्नुते च
सर्वं यथावदिह तत्कथितं क्रमेण ॥ ५८ ॥

मा नाम भूदखिलमन्यदिमं प्रदेशम्
अध्यापितास्तदिति मन्त्रविदो भवन्ति ।
वाच्यः किमस्य सविता सवितुर्वरेण्यः
किं वा भवानिति वितर्कपदं न तेषाम् ॥ ५ ९ ॥

भास्वन्तमेष विषयी कुरुते न मन्त्रः
शक्नोति वक्तुमघिदैवतमीश्वरं त्वाम् ।
यस्मादयं त्वयि निरोहति भर्गशब्दः
प्रज्ञाप्रचोदकतया तदधीयसे त्वम् ॥ ६० ॥

सान्तोऽयमन्तकरिपो ! यदि भर्गशब्दो
यत्तत्पदद्वयमनन्वयि लिङ्गभेदात् ।
अन्वेषये दुभयमन्यदभिच्चलिङ्गम्
अश्रूयंमाणभसमञ्जस एष पेक्षः ॥ ६१ ॥

शब्दस्मृतिर्ह्यसुनि वा घनि वा पदान्ते
युक्त वदत्युभयथा स्वरमायुदात्तम् ।
व्यत्यस्तकारकमवैमि पदं घञन्तं
मैत्रायणश्रुतिपराहतसान्तभावम् ॥ ६२ ॥

मैत्रायणतिरस तदिति प्रकृत्य
भर्ग भवन्तममिधाय विचिन्तनीयम् ।
रुद्रस्य भर्गपदगोचरतां ब्रुवाणा
सान्तं प्रतिक्षिपति भर्गपदं पुरारे ! ॥ ६३ ॥

सान्तं पदं तदपि नैव ददाति वक्तुं
यद्ब्राह्मणन्तलवकारिण आमनन्ति ।
प्रश्नोत्तरक्रमनिरूषितपूर्वपाद
पादं द्वितीयमपि भर्गमयं ब्रवीति ॥ ६४ ॥

भर्गः प्रचोदयति यो घियमस्मदीयां
तं धीमहीति घटना विनिमाय लिङ्गम् ।
वाव्यस्य भर्ग भवतस्खपदाभिधानं
भर्गाख्यमित्यपि च साम्बवचोनुरोधः ॥ ६५ ॥

त्यामेव मन्त्रोपनिषत्रवीति
तदित्यूचोऽस्याः प्रतिपाद्यमर्थम् ।
तदक्षरं तत्सवितुर्वरेण्यं
प्रज्ञा च तस्मात्प्रसृता पुराणी ॥ ६६ ॥

भार्गोऽपि सन्सवितृशब्दसमन्वयेन
सावित्रतामपि विगाहत एव मन्त्रः |
तत्तत्पदान्वयवशेन महेश ! मन्त्रान्
तद्देवतानपि हि मन्त्रविदः पठन्ति ॥ ॥ ६७ ॥

अप्यर्कदैवतवती मृचमामनामः
शब्देनविश्व इति शंकर ! वेश्वदेवीम् ।
पिच्याञ्च मर्त इति पुष्यपदेन पौष्णीम्
एतादृशानि कति नाम निदर्शनानि ॥ ६८ ॥

एषा गतिश्श्रुतिगिरा मिति निर्णयेन
ततद्ग्रहार्चनविधौ मुनयस्स्मरन्ति ।
मन्त्रेण शंकर | शनेश्श मुपक्रमेण
बुध्यस्खशब्दसहितेन बुधस्य पूजाम् ॥ ६९ ॥

आम्नायमृग्यजुषसामविधं विचिन्त्य
सारं समुद्धृतवता परमेष्ठिनापि ।
मन्त्र स्त्रिपादयमदृष्टविधान्तरेण
दृष्टश्चराचरगुरो ! मनुना यथोक्तम् ॥ ७० ॥

गृह्णातु काममनलस्सकलं हविस्ते
राज्ञो बलिं हरतु भागदुषः प्रजाभ्यः ।
पान शंकर ! निवेदितमंबुजाक्षे
नैशं हविस्फुटमदृश्यत पादयोस्ते ॥ ७९ ॥

सोमं त्वदर्थमनुशुश्रुम सूर्यमान
आलमनं पशुपते ! नियतं पशूनाम् |
गव्यं च ते गवि सदेव तदध्वरेषु
चण्डेश्वरेण सह नाकसदां विवादः ॥ ७२ ॥

उत्पत्तितश्शिव ! गृहीतसमन्वयास्ते
सोमः पशुर्गवि च सन्ति हवींषितानि ।
देवाः पशौ हविषि भागमनुज्ञेया ते
गृहन्ति तद्वदितरेष्वपि कल्पनीयम् ॥ ७३ ॥

कर्मैकमेब न परं पशुबन्धनं ते
कर्तव्यमाहुरुपलभ्य तवाभ्यनुज्ञाम् ।
सर्वेषु कर्मसु भवत्प्रसवेन पुंसां
आरंभणं प्रपदमन्त्रविदो गृणन्ति ॥ ७४ ॥

सङ्कल्पतः प्रभृति यज्ञतनुं विभज्य
देवान्प्रजापतिमुखान्प्रति दर्शयन्तः ।
सोमाहुति हुतवहाचिषि हूयमानाम्
अध्वर्यवस्तव गृणन्ति गिरीश ! भागम् ॥ ७५ ॥

सबै धन धनपते रुपभुक्तशिष्टं
यद्देवतातिथिसमाश्रितभृत्यवर्गैः ।
यज्ञेश यज्ञपरिशिष्टमपि त्वदीयम्
अन्थिग्रहव्यतिकरे भवता यथोक्तम् ॥ ७६ ॥

गव्येन सोमहविषा चरुमिश्र पक्कैः
साध्यान्त्रिसप्त सुनयो विभजन्ति यज्ञान् ।
सर्वेषु तेष्वपि भवानविशेषतस्त्वां
राजानमध्वरविधौ वयमामनामः ॥ ७७ ॥

अनिं प्रकाशयतु शंकर ! रुद्रवन्तं
मन्त्रस्त्वमग्र इति वा तदनन्तरो वा ।
राजन्वती क्षितिरितीव विशेषणस्य
नालं प्रतीपमपनेतुमिमौ प्रकर्षम् ॥ ७८ ॥

या रोहिणी भवति देव ! तदा त्वदीया
तस्यां त्वदेकविषयौ विषमाक्ष ! दृष्टौ ।
मन्त्राविमौ तदिह यज्ञपतित्वमीश
स्पष्टं त्वदेकविषयं प्रतियान्ति धीराः ॥ ७ ९ ॥

पित्रा कुमारमिव भृत्यमिवेश्वरेण
शिष्यं गिरीश ! गुरुणेव गुणाधिकेन ।
अभि त्वया कृतविशेषण मूचिवांसौ
मन्त्राविमौ गमयतः परभं प्रकर्षम् ॥ ८० ॥

ऋक्संहिता वदति मेधपतिम् भवन्तं
राजानमध्वरविधेरयमाह मन्त्रः ।
त्वत्सूक्तमन्त्रगण मण्डनमौळिरत्नम्
रूपेण च त्वदमिधानगृहीतशक्तिः ।। ८१ ।।

त्वत्कं पुरा मरणतस्तनयित्नुकल्पा
दाकारणं परमकारुणिक ! ब्रुवाणः ।
मन्त्रोऽयमाव इति यावदुपक्रमायाः
मूलं महेश ! विदितं शिवधर्मसूक्तेः ॥ ८२ ||

भीमोऽसि शंकर ! मृगो नु निदर्शनं ते
तेजोभिरुच्चलितसूर्यसहस्रकल्पैः ।
अक्रोधनस्मितमुखोऽपि निजानुभावात्
आपाततस्तनुभृतां नृपतिर्भयाय ॥ ८३ ॥

अभ्युद्यत गिरिश ! वज्रमधीमहे त्वां
त्वद्बिभ्यतः पवनभानुकृशानुशक्राः ।
मृत्युश्च तत्तदधिकारभृततथान्ये |
ब्रह्मत्वलक्षणमयं भयहेतुभावः ॥ ८४ ॥

घोरा शिवा च भगवन्नुभयी तनुस्ते
घोरा भिषज्यति भवार्तमुपास्यमाना ।
अन्या भिषग्जनकृतां रुजमीक्षमाणा
दृष्ट्या ददाति शिवता मशिवात्मनोऽपि ॥ ८५ ॥

घोरान्नमो विदधतश्शमयन्ति रुद्रैः
आर्ता हि घोरमुपयान्ति चिकित्सितारम् ।
प्रीणन्ति शंकर ! शिवां चमकानुवाकैः
होमस्य यत्तव भवन्त्युभयेऽपि मन्त्राः ॥ ८६ ॥

विष्णुप्रजापतिपुरंदरपूर्वकेषु
वाजादितुल्पमितरेष्वपि दैवतेषु ।
आशंसितेषु चमकाः परिशिष्यमाणं
दातारमीश्वर ! भवन्तसंशब्दमाहुः ॥ ८७ ॥

युक्तं नमानयितुमीश्वर ! सन्निधौ ते
देवान्तराणि महतामिव मर्त्यमात्रम् ।
अन्तर्द्धिमध्वरविधौ तदपेक्षमाणाः
त्वत्कर्मसीम्नि परिषेचनमाचरन्ति ॥ ८८ ॥

आत्मान्तराणि पशवः परतन्त्रभावात्
स्वातन्त्र्यतः पशुपते ! पतिरीश्वर ! त्वम् ।
आत्मानमौपनिषदाः प्रवदन्त्यनीशं
ईशं भवन्तमुभयोरुभयं स्वभावः ॥ ८९ ॥

संप्राप्त एव सति शंकर ! पाशुपत्ये
कस्मै वरेण्य | वरणं कृपणोचितं ते ।
विध्यर्थमध्ययनचोदनयागृहीता
जल्पन्ति यत्किमपि वन्दिवदर्थवादाः ॥ ९० ॥

नानापदानवचनादपि चारणीयः
त्वत्पाशुपत्यवरणप्रतिलंभवादः ।
लब्धुं वरीतुमथवा कथमेक एव
वारान्बहूनपि महेश्वर ! शक्यतेऽर्थः ॥ ९१ ॥

अस्थिरेमिरिति रूपमनश्वरन्ते
भूरीणि तानि च भुजङ्गममालभारिन् ! ।
मन्त्रेण चान्तरिति युष्मदुपासकाना
मार्वेदिका यदशनं तदमोघमाहुः ॥ ९२ ॥

भावोपपन्नमनसां त्वदुपासकानां
पुंसाममोघमशनं भगवन्ब्रुवाणः ।
मन्त्रोऽयमन्तरिति नः प्रतिभातिमूलं
प्राग्भुक्तमर्चनविधेरनुवासरं ते ॥ ९३ ॥

नाथ ! त्वया पितृमतो मरुतस्तुवानाः
त्वामामनन्ति भरतं नटनामियोगात् ।
वैशेषिके सति खलु व्यपदेशहेतौ
साधारणेन भरणेन न कश्चिदर्थः ॥ ९४ ॥

हिंसाप्रतीतिरभिमानपदैकदेशात
शब्दादमेरिति भयेन सुमुद्रपन्ति ।
कामान्तकत्रिपुरदक्षमखादिभंग
विख्यातविक्रमतया कथितोऽसि वीरः ॥ ९५ ॥

हिंसामिधातृपदसन्निधिना ज्वरार्थम्
रुद्रेति नाम परिशंक्य परावयन्तः ।
मन्त्रे यथान इति मङ्गळवाचि दृष्टम्
देवेश ! रुद्रियपदं पुनरावपन्ति ॥ ९ ६ ॥

शाखासु शङ्कर ! सहस्रतयीषु साम्नां
आम्नायते तब न केवलमानुभावः ।
सर्वात्मनामधिपतेर विशेषतस्ते
देवव्रतादिषु गणाः कथितानुभावाः ॥ ९ ७ ॥

स्कंद विनायकमुभावपि ते कुसारौ
सर्वैर्गुणैः पितरमेव निदर्शयन्तौ ।
सामोपगायमुपगायमृचां गणेषु
संप्रीणयन्ति शिव ! सामविधौ यथोक्तम् ॥ ९८ ॥

ब्रह्मादिकं सकलमन्यदपोध पुंसां
ध्यातव्यमेकमभिधाय शिवंकरं त्वाम् ।
बक्तव्यमन्यदनपेक्ष्य विमोक्षहेतुं
आथर्वणः परिसमाप्तिमुवाचं वेदः ॥ ९९ ॥

यामामनन्ति तब शंकर ! धर्मदारान्
अध्वर्यवस्सहजतिद्वतया स्वसारम् ।
आथर्वणा यदुपसृष्टतया भवन्तं
ध्यातव्यमाहुरपहाय पितामहादीन् ॥ १०० ॥

एकश्श्रुतोऽसि परमेश्वर ! सद्वितीयं
मन्त्रा यया व्यपदिशति पुनः पुनत्स्वाम् ।
तस्याः प्रभावमतिवायनर्स शिवायाः
कात्स्र्येण वक्तुमनलं कमलासनोऽपि ॥ १०१ ॥

एकं मुर्ख त्रितयमीश्वर ! लोचनानां (लोचनं च)
चत्वारि दींषि विशदं वपुरद्भुतं ते ।
नित्यं तदेव भजतामुपकारहेतोः
नाना भवन्ति तनवस्तव दिव्यरूपाः ॥ १०२ ॥.

कैरातमीश्वर ! पिनाकधरं वपुस्ते
कृत्तिम् वसानमुमया सह धर्मदारैः ।
आराधयन्ति खलु पर्वणि साकमेघे
पुण्यैस्त्रियंबक हविभिरनन्यभावाः || १०३ ||

मीढ्वांसमन्तविनिवेशितमीढुषीकं
अन्तर्जयन्तमजरामरविग्रहं त्वाम् |
त्वद्द्वारपं दयितया सह देवसेन
क्षेत्रस्य नाथमपि नाथ ! यजन्ति धन्याः ॥ १०४ ॥

पत्न्या समं सह गणैस्सह वा सुताभ्यां
साधं तथा परिषदा विषमेक्षण ! त्वाम् ।
अध्यष्टमीतिथिनिशामुखमर्चयन्तः
पापं तरन्त्यपि जयन्ति महेश ! मृत्युम् ॥ १०५ ॥

मन्त्रा भवन्ति विरळा विबुधान्तराणां
सद्भाव एव शिव ! दर्शितशक्तयस्ते ।
त्वन्नामरूपगुणवर्णनलब्धवर्णा
मन्त्रा न शक्यमवगंतुमियत्तया ते ।। १०६ ।।

रुद्रानुवाकपठितानि परस्सहस्रं
नामानि दिव्यमपि रूपमनेकशस्ते ।
शक्यं गुणा गणयितुं गणना यदि स्यात्
भौमेषु पांसुषु विना तव देव ! मायाम् ॥ १०७ ॥

वेदस्स्वयं भवतु वा तत्र वा प्रणीतिः
सर्वः प्रमाणमविहाय गृणाति लोकः ।
तत्तत्प्रवक्तृगुणदर्शिततारतम्यं
अन्यत्प्रमाणमविरोधिनि वेदवाक्ये || १०८ ||

बेदाः प्रमाणमिति संगिरमाण एव
        दिव्यं तवागममवैति जनः प्रमाणम् ।
त्वद्ध्यानवाक्यविषयौपयिकैः पदार्थैः
        आमूर्द्धमाकलितविग्रहमाच मूलात् ॥ १०९ ॥

ध्यानं यथा भवति तद्विषयो यथा त्वं
        यादृग्गुणश्च भगवन्नधिका रिवर्गः ।
सर्वाणि तानि भवदागमसंहिताभिः
        कल्पैरिवाध्वरविधेरुपपादितानि ॥ ११० ॥

अध्वानमध्वपतिमध्वनि तारतम्यं
        श्रेष्ठाध्वपारगमनं च फलं ब्रवीति ।
मन्त्रोऽध्वनामिति महेश्वर ! गृह्यकार :
        पिता कुमारमुपनीय वदन्हि वाक्यं ॥ १११ ॥

कल्पाः प्रमाणसृषिभिर्यदि नः प्रणीताः
        किन प्रमाणभूषिणा महता वहर्षे ! ।
शक्यं न वक्तुवपरिग्रहदूषितानि
        तन्त्रान्तराणि भवता शिव | कर्तृमन्ति ॥ ११२ ॥

आचक्षते यमृषिमार्षविदस्तपोभिः
        एकैकमन्त्रदृशमीश्वर ! वेदराशेः ।
द्रष्टारमस्य निविलेन निजानुभावात्
        अन्यानृषीनति महर्षिमतो विदुस्त्वाम् ॥ ११३ ||

उक्त प्रधान पुरुषेश्वरमेव सांख्यैः
        आख्याय पाशपशुपत्यभिधानभेदात् ।
ज्ञेयं त्वदागमविदश्शिव ! सङ्गिरन्तां
        एतावता किमिति नस्तदुपेक्षणीयम् ॥ ११४ ॥

प्रत्यक्षवेदविहितं प्रथितं पुराणैः
बोधायनेन मुनिना बहशः प्रणीतम् ।
सर्वार्थदर्शनपरैरपि गृह्यकारैः
यज्ञोपवीतमिव विस्मृतमर्चनन्ते ॥ ११५ ॥

वेदोपवृक्षक पुराणवचःप्रपञ्चैः
आघोष्यते विषमनेत्र | समर्चनन्ते ।
तन्त्रैरलं तदुपबृझकवेदमूलैः
वात्याहतं न हि मुखानिलसव्यपेक्षम् ॥ ११६ ॥

वेदार्थनिर्णयविधौ हि पुराणमङ्गं
निर्णीतवेदविषया स्मृतयो भवन्ति ।
आतश्रुतेरिव पुराणगिरस्सकाशे
नाले प्रकाशयितुमात्मबलावलेपम् ॥ ११७ ॥

मूलश्रुतेरनुपलंभपराहतायाः
दूतीव या न भवति स्वरसात्प्रमाणम् ।
प्रत्यक्षवेदविहितं यजनं त्वदीयं
तस्या स्मृतेरपि किमिच्छति दृष्टिपातम् ॥ ११८ ॥

पौर्वाह्निकानुपदिश नियमान्यदेतत्
अभ्यर्चन मनुरखोचत देवतायाः ।
तल्कि पुनस्तव महत्यसि देवता त्वं
मृग्ये च काचशकले न मणेरुपेक्षा ॥ ११ ९ ॥

पत्न्या समं सह वृषेण वृषेन्द्रकेतो
युष्मद्बलीनुपदिशन स्त्रिदशावकाशे |
अभ्यर्चनं भवनकल्पनपूर्वकं ते
बोधायनः कथितवानवयुत्य गृह्ये ॥ १२० ॥

भावान्तराणि परिहाय महत्सु नित्यं
विज्ञानयोगविभवेषु महीयसे यत्।
देवो महानमिहितोऽसि ततः कपर्दिन्।
नाम त्वदीयमिदमाङ्गिरसा निराहुः ॥ १२१ ॥

द्वेधा तवार्चन विधिस्तरुणेन्दु मौके !
कामाय कश्चिदपरो दुरितक्षयाय।
अप्यग्निहोत्रमुभयं वयमामनामः
स्वर्गाय यद्भवति यदुरितं क्षिणोति ॥ १२२ ॥

यद्ब्राह्मणस्त्वमसि नाकवतां निकाये
तुभ्यं निवेदितमभोज्यमिति स्मरन्ति।
उच्छिष्टमीश्वर विशिष्टमपि द्विजानां
भूमौ निखेयमथत्रांभसि मज्जनीयम् ॥ १२३ ॥

त्वं ब्राह्मणत्व दुपधावनमेव कार्यम्
तद्ब्रह्मणैस्त्वदितरे न भवन्त्युपास्याः।
न ब्राह्मणानवरवर्णनिषेवणेन
संभावयेम यदि नः प्रपदं प्रमाणम् ॥ १२४ ॥

उत्कर्षतः परिहरन्त्यपकर्षतो वा
का वासना भवति कस्य कृते न विघ्नः।
यद्दीक्षितस्य पतितस्य च तुल्यरूषं
प्रत्यादिशन्ति मुनयः कमनीयमन्त्रम् ॥ १२५ ॥

चण्डालचण्डिलचितानलशौण्डिकानां
गोब्राह्मणज्वलनदीक्षितयोषितां च। :
स्वर्शः कया भवति वासनया निषिद्धः
स्पृष्टेषु वा शिव ! कथा विहिता विशुद्धिः ॥ १२६ ॥

वर्ज्यान्नमाहुरपि दीक्षितसग्निकल्पं
भोज्यानमेवकृतराजपरिक्रयं
शंखास्थि पावनमपावनमस्थि नृणां तम्।
इत्थं स्थिते वचनमत्र परायणन्त्रः ।। १२७ ।।

अब्राह्मणैः क्षुदपधातकमस्तु भोज्यं
यद्देवतान्तरनिवेदितमुक्त मन्त्रम्|
तद्ब्राह्मणैरपि किमीश्वर ! वैश्वदेवे
हार्यो बलिर्बलिमतामशितेन तेन ॥ १२८ ।।

देवान्तरैरशित मुक्त मर्नङ्गशासिन्
अश्नन्ति चेदनशितेन बलिम् हरन्तः ।
आग्यैकदेशविहितो बलिरन्यथासन
नाल फलाय विपरीतफलाय तेषाम् ।। १२ ९ ।।

ब्राह्मणमीश्वर ! पुरा हतवानसीति
भिक्षाटनं विमृशतः प्रतिभानमात्रम्|
यत्पञ्चमे शिरसि पुष्पसमं निकृत्ते
जीवन्तमेनममितायुषमाहुराप्ताः ॥ १३० ।।

आनाभिजानु वसितं बसनं न शाणं
पाणौ कपालशकलं न विलोकितं ते ।
नालंवते शवशिरस्तव केतुयष्टौ
भैक्षं न सांप्तभवनं सकलं तदास्ताम् ॥ १३१ ॥

यत्कालभैरवकृतं पतनीयमेनः
किं तेन ते भवति भैक्षमथापि वृत्तिः ।
तन्मध्यपातिनि वधे विषुधान्तरस्य
निर्वेदमाचरसि किन्तु भवानजस्रम्|| १३२ || ॥

यत्पाशुपत्यमवृणोदमरांत रेभ्यो
भिक्षां भवानकृतयत्परमेश्वरोऽपि ।
चोद्यं तदेतदुभयं परिहर्तुकामो
मन्ये बृहस्पतिरपि प्रतिपत्तिशून्यः ॥ १३३ ॥

ब्रह्मासि विष्णुरसि सर्वमसीति यत्वाम्
आस्तामुपासनविधिम् कथयन्ति मूढाः ।
तद्देवतान्तरनिकर्षनिगृहनाय
मोहाय वा भवतु जल्पितमल्पबुद्धेः ॥ १३४ ॥

अद्वैतमागमशिरोभिरुपासनायां
उक्तं तवेति परमार्थतथा न वाच्यम् |
भेदस्फुठो गरुडमान्त्रिकयोरळीकं
तादात्म्यभावनमथापि विष प्रमाष्ठि ॥ १३५ ॥

यद्ब्रह्मपंचमशिरोलवनापदानं
यद्ब्रह्मणा च हरिणा च विमार्गणं ते ।
यद्वा तयोर्जनयितारमधीमहे त्वां
तत्सर्वमीश्वर ! विमूढधियामसह्यम् ॥ १३६ ॥

सोमे लतात्मनि महेश्वर ! गौणवृत्या
विष्णोरवादि जनकत्वमृचा कयापि ।
त्वय्येव तद्भवितुमर्हति मुख्यवृत्या
नेन्द्रे न पङ्कजभवे नितरां मुरारौ ॥ १३७ ॥

अन्योन्यतो यदि भवेदहमीश्वरस्स्यां
त्वं चाहमीश्वर ! किमत्र नियामकं नः |
को वा विपर्यसितुमर्हति वस्तुशक्तिम्
तत्तत्स्वभावनियतां भवदाज्ञयापि ॥ १३८ ॥

एकं तवाप्यसुकरं तद्वाहरामो
जातेन भाव्यममरान्तरवस्वयापि ।
अभ्यर्थितोऽपि हि महेश ! महर्षिदारैः
अन्तर्हितस्त्वमसि गर्हितगर्भवासः ।। १३ ९ ।।

इच्छावतीर्ण मुरशासनगर्भवासः
स्याच्चेदुदाहरणमेप विमर्शनीयः ।
गर्ने वसामि परिवेष्टय जरायुणाऽहम्
मासान्बहूनिति महेश्वर ! कस्य कामः ।। १४० ।।

इच्छापि नूनमनुयाति पुरा कृतानि
कर्माणि शंकर | शुभाशुभलक्षणानि ।
इच्छावतारवचनानि तु भारतादौ
नारायणस्य गुणवादमुदाहरन्ति ।। १४१ ।।

विधातारं कश्चिद्भजति भजते कञ्चन हरिम्
सुरानन्यानन्ये जगति सफलास्सर्वविधयः ।
तथापि त्वद्भक्तेश्शिव ! शिव ! यदा चर्मवदिति
श्रुतो मन्त्रो देवान्तरभजनदैन्यं न सहते ।। १४२ ।।

शशे भृङ्ग पुष्पं नभसि मृगतृष्णासु सलिलम्
प्रसूतिर्वन्ध्यांया मनवधिमदायुस्तनुभृताम् ।
विमुक्तिर्वा देवान्तरभजनलभ्या पशुपते !
न शक्यं नस्संभावयितुमपि सर्वम् विमृशताम् ||

न भिन्ना नौरन्यानलमुदनिधे रुद्गमयितुं
शिला नैवोन्नेतुं प्रभवति शिलामन्तकरिपो ! ।
जनित्वा मृत्वा वा जगति परिवर्ती सुरगणः
कथं मे संसारभ्रमणभयभाजंस्तु शरणम् ।। १४४ ।।

देवतान्तरपुनः पुनर्भवं पश्यतः पशुपते ! भयं मम ।
क्रीडतोऽपि तव जन्म मास्मभूत् दीयतामयमपश्चिमो वरः || १४५ ||

वासनापरिगृहीत देवता वर्णनौपयिकसर्ववाङ्मयम् ।
घिग्धिगीश्वर ! जडाशयं जनम् तावकैरहमसानि सङ्गतः ॥ १४६ ॥

पांसुकेळिरपि यस्य शैशवे शैवपाशुपतपादपांसुमिः ।
स्तोत्रकर्मणि न तस्य मे गुणः तद्गुणोऽयमुपपद्यते त्वयि ॥ १४७ ॥

स्तोत्री यमर्थमुपपादितवानहं ते
भक्तति भक्तजनवत्सल ! भाषमाणः ।
आविर्धभूविथ शिखी शुचिनाम्वरेण
यज्ञोपवीतमुपवीय धृतत्रिपुण्ड्रः ॥ १४८ ॥

भक्तं भवानदित पार्श्वचरोपनीतं
मह्यं महेश्वर ! पयश्श्रपितं प्रसन्नम् ।
भुञ्जान एव तदहं झडितिप्रबुद्धः
स्वमस्समाधिरिति युक्तधियमभिन्नः ॥ १४ ९ ॥

स्तोत्रमेतदवधाय गृह्णतां अर्थमस्य निखिलेन जानताम् ।
ग्राह्यमन्यदपि नावशिष्यते ज्ञेयमन्यदपि वा न किश्चन ।। १५०

पञ्चाशदुत्तरशता श्रुतिसूक्तिमाला
भोगावळी भुजगराजमनोहरा ते ।
वेदेषु भक्तिमपरागमवैदिकेपु
तन्त्रेषु भक्तिमतुलां त्वयि च प्रसूते ॥ १५१ ॥

॥ समाप्ता श्रुतिसूक्तिमाला ॥

मिथ्या कल्पित भोगमोक्षदवचस्सन्तान सत्वापन
व्याग्राणामचिर प्रभावविबुध प्रेम्णा महेशद्विषाम् ।
मूर्ध्निष्वेक दुरात्मनां विरचिता निर्धातवाताः परैः
विद्वद्भिः परमेश्वर श्रुतिकथा तात्पर्य सङ्ग्राहकैः ।।

तत्वप्रकाशिकाख्या व्याख्या शिवलिंग भूभुजारचिता ।
प्रख्यात मेव भक्तिः पुरहरपादांबुजार्पिता सततम् ।।

अघटितघटनापटवे प्रकटित करुणाय गगन सिन्धु भूमे ।
वटतरुमूलस्थितये विघटित तमसे महेश्वराय नमः ॥

॥ सर्व साम्बशिवार्पणमस्तु ॥

|| ओम् नमः शिर्वाय ||

# ॥ श्री हरदत्तचार्यकृता पञ्चरत्नमालिका ||

गायत्री वल्लभत्वात् दशरथतनय | स्थापिताराधितत्वात्
शौरे : कैलासयात्राव्रतमुदितयांऽभीष्ट सन्तानदानात् ।
नेत्रेणस्वेन साकं दशशतकमलैः विष्णुनापूजितत्वात्
तस्मै चक्रप्रदानादपि च पशुपतिः सर्वदेव प्रकृष्टः ॥ १ ॥

कन्दर्पध्वंसकत्वात् गरलकवळनात् कालगर्वापहत्वात्
दैतेयावासभूतत्रिपुर विदळनात् दक्षयागे जयित्वात् ।
पार्थस्य खानदानात् नरहरि विजयात् माधवे स्त्री शरीरे
शास्तुस्संपातकत्वादपि च पशुपतिः सर्व देवप्रकृष्टः ॥२ ॥

वाराणस्यां पाराशरि नियमि भुजस्तंभनात् प्राक्पुराणां
प्रध्वंशे केशवेनाश्रितवृषवपुषा धारित क्ष्मातलत्वात् ।
अस्तोकै ब्रह्मशीषै रनिशगलकृतालंक्रिया भूषितत्वात्
दानात्प्रज्ञान मुक्त्योरपि च पशुपतिः सर्वदेवप्रकृष्टः ॥३ ॥

भूमौ लोकैरनेकैः सततविरचिताराघितत्वादमीषाम्
अटैश्वर्य प्रदानात् दशविधवपुषा केशवेनाश्रितत्वात् ।
हंसक्रोडाङ्गधारि द्रुहिण मुरहरान्विष्ट शीर्षांघ्रिकत्वात्
जन्म ध्वंसा द्यभावात् अपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

वैशिष्टये योनि पीठायितमुररिपु श्लिष्टभावेन शंभोः
सस्त्रीकार्द्ध प्रतीकायित हरिवपुषाऽलिंगतत्वेन यद्वा ।
अप्राधान्यात् विशिष्टाद्धय समधिंगमे दानवानामरातेः
शंभोरुत्कृष्ट भावादपि च पशुपतिः सर्वदेव प्रकृष्टः ॥५ ॥

# परशिव स्तोत्राणि (शिवरहस्ये)

महादेवो देवः श्रुतिशिखरमौळिस्थवचनैः
तथान्ये विष्णवायाविधिहरि हरेन्द्रानलयमाः ।
महादेवा जाताः श्रुणुत वर सोमेनजनिता
अतो वेद्यो भवति शिव एकः शिवकरः ॥ १ ॥

मखानामेवायं प्रभुरखिल विश्वाधिकहरो
महर्षिर्वेदादौ स्वरजनिततारः परशिवः ।
यतो ब्रह्मेन्द्राद्या हरि रविमुखा रुद्रनिवहाः
प्रसूता ध्येयोऽयं श्रुति शिखरवाक्यैः परशिवः ॥ २ ॥

ऋतं सत्यं देवः पुरुषपरमो भूतहृदयो
नतोऽन्तानां शेषी श्रुतिवरमहारुद्रवचसा |
रखेरन्तयेयो भवति स हि भर्गेन वचसा
द्विजैर्गायत्र्यां तु प्रतिपदसुपास्यः परशिवः ॥ ३ ॥

यतो वाचः शंभो र्भवति च निवृत्ताश्रमनसा
महानन्दं यस्माद्भवति जनतास्स्वेव निपुणम् ।
जगद्यस्माज्जातं प्रभवति महेशेन जनितम्
अतोऽन्ते यस्मिस्तद्भवति च विलीनं परशिवे ॥४ ॥

द्विजानां जाबाल श्रुति शिखर वाक्यैश्च विहितो
महात्रैविद्योक्तश्रुति गदित वर्णाश्रम विधिः ।
शिवस्यार्चा लिङ्गे श्रुति गदित भस्माक्ष विधृतिः
जपो रुद्राध्याय श्रति गदित पञ्चाक्षरमनोः ॥ ५ ॥

विष्णु ब्रह्मानलेन्द्रा मुनि नृपदितिजा यस्य लिङ्गार्चनाद्वै
संप्राप्ताः पदवीम् सदैवमुदितास्ते कर्मदेवा जनाः ।
एतत्सत्यमहो त्रिसत्यमधुना वच्मीद मग्नीशितुः
सानिध्ये निवसामि शीतलमहापद्येव तप्तायसे || ६ ||

श्री हरदत्ताचार्यविरचितम्

# साम्बपरब्रह्म स्तोत्राणि

(भविष्योत्तरपुराणम्)

साम्बो नः कुलदैवतं पशुपते साम्ब त्वदीया वयं
साम्ब स्तौमि सुरासुरोरग गणाः साम्बेन सन्तारिताः ।
साम्बायास्तु नमो मया विरचितं साम्बात्परं नो भजे
साम्बस्य अनुचरोऽस्म्यहं मम रतिः साम्बे परब्रह्मणि ॥ १ ॥

विष्णवाद्याश्च पुरलयं सुरगणाः जेतुं न शक्तास्स्वयं
यं शंभुं प्रणता वयंतु पशवोऽस्माकं त्वमेवेश्वरः ।
तेनास्मिन्शरणागतान्पशुपते पाहीत्यवोचं द्रुतं
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ २ ॥

यस्येषुः कमलेक्षणः पशुपतेरब्जोद्भवस्सारथि
स्य ज्याफणिनासिनोरथपदे यस्येन्दुसूर्यावुभौ ।
मेरुर्यस्य शरासनं रथवरो भूमिस्तु यस्याभवत्
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ३ ॥

यद्भक्तो मृगुरिन्दिरापतिमहो शापस्थ लक्ष्यं भृशं
कृत्वा स्वां दयितां मृतां स्वमनुभिश्शैवैरयुङ्तासुभिः ।
यं ताराधिपचूडमागमशिरो विश्वाधिकं गायते
तस्मिन्मे हृदयं सुखेन रमताः साम्बे परब्रह्मणि ॥ ४ ॥

गोविन्दादधिकं न दैवतमिति प्रोचार्य हस्तावुभौ
उद्धृत्याथ शिवस्य सन्निधिगतो व्यासो मुनीनां पुरः ।
यस्यस्तम्भिवपाणिरानतिकृता नन्दीश्वरेणाऽभवत्
तस्मिन्मे हृदयं सुखेन रमतां साम्बे पराब्रह्मणि ॥ ५ ॥

विष्णुस्थावरजङ्गमात्मकजगत्स्वामी विरिश्चाधिको
यद्धकेन सहासुरेश्वररिपुर्युद्धं दधीचेन सः ।'
कृत्वा शीघ्रमहो द्विजादपजयं तस्माद्द्वतोभूभृशं
तस्मिन्मे हृदयं सुखेन रमता साम्बे परब्रह्मणि ॥ ६ ॥

कादीनाञ्च भयंकरः स्वमहसा व कृत्यैर्भृशं
कोपान्धो जितदानवो नरहरिर्यस्यांशभूतेन सः ।
लोकेशश्शरमेण शिक्षितमदोभूल्लीलयाऽर्धक्षणात्
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ७ ॥

विष्वक्सेनमपीन्दिरापतिसमं तं रक्तमिक्षाच्छलात्
संहत्याथ सभैरवश्शाशिधरो यस्यांशभूतो जटी |
ब्रह्मायामरशिक्षकस्य बलिनो विष्णोर्मदञ्चारत
तस्मिन्ये हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ८ ॥

येनापादितमङ्गजाङ्गमसितं दिव्याङ्गरागैस्समं
येनस्वीकृतमब्जसंभवशिरस्सौवर्णपात्रैस्समम् ।
येनाङ्गीकृतमच्युतस्यनयनं पूजारविन्दैस्समम्
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ९ ॥

विष्णुब्रह्मसुराधिपप्रभृतयस्सर्वेपि देवा भृशं
संमृताजलघेर्विषात्परिभव प्राप्तायमेत्येश्वरं ।
खखस्थाननियोजिता गतशुचः स्वस्था बभूवुढा :
तस्मिन्मे हृदयं सुस्बेन रमतां साम्बे परब्रह्मणि ।। १० ।।

यस्त्रिगुणान्वितमधुमिच्छ्लायुधेभ्यरिशवो
दत्वैतानथ तान् गृहीतुमनयोश्शक्त्या पुनर्हीनयोः ।
ताभ्यां साकमहो गुणत्रयभृते रुद्राय साम्यं ददौ
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ११ ॥

# ॥ श्री हरदत्तचार्यवर्य पञ्चरत्नमालास्तुतिः॥

पशुपति परतन्त्रोद्धारणायैव नूनं
भृगुमुनिकृतशापाल्लुब्धमानुष्यभावः ।
हरिरिति बुधवर्याः यं वदन्दि प्रमाणैः
स जयति हरदाचार्यवर्यो महात्मा ॥

घटमुनितनयायाः पावने तीर्थसङ्गात्
अनलविनुतशंभोः शोभिते लिङ्गमूर्त्या
समजनि नगरे यः कंसनाम्नि प्रसिद्धे
स जयति हरदत्ताचार्यवर्यो महात्मा ||

परशिववरमूर्तिध्याननिष्ठान्तरङ्गः परशिवशुभनामोच्चारणे सक्तजिह्वः ।
परशिवमततत्वस्थापने बद्धदीक्षः स जयति हरदत्ताचायवर्यो महात्मा ॥

परशिवशुभलीलासागरे मग्नचित्तः
परशिवमयबुद्ध्याऽऽलोकिताऽशेषलोकः ।
परशिवपदसेवाकर्मभिः यः प्रजुष्टः
स जयति हरदत्ताचार्यवर्यो महात्मा ॥

निगमशिरशिसंस्थः शंभुरेव प्रकृष्टः इति हरिपुरतो यः तप्तपीठ स्थितस्सन्
श्रुर्तिवचन सुमालाग्रन्थमूलं बभाषे स जयति हरदत्ताचार्यवर्यो महात्मा

इहपरसुखद श्री कामकोटीगुरूणां चरणकमलरेणु ध्यानचित्तवक्लुप्ता |
गुरुवरहदत्ताचार्यबक्ष : प्रदेशे विलसतु सततं श्री मालिनीवृत्तमाला ॥

इति श्री मल्लादि दक्षिणामूर्तिविरचिता श्री हरदत्ताचार्यवर्य
पञ्चरत्नमालास्तुतिः संपूर्णा ॥
॥ शुभम् ॥

# ॥ अथ महामन्त्र ध्यान श्लोकाः ॥

॥ श्री हरदत्ताचार्यवर्य महिम्नस्तवः ॥

॥ श्रीमल्लादि दक्षिणामूर्ति विरचितः ॥

॥ औं नमो भगवते हरदत्ताय ॥

ओकारवेद्यविभवस्य महेश्वरस्य संचोदनेन शिवतत्वनिरूपणाय ।
भूमिं गतं मधुहरं भुवि यं वदन्ति तस्मै नमो भगवते हरदत्तभूम्ने ॥

नन्तव्यमेकपुरुषं शिवमेव नान्यं मन्तव्यमेकमनुमीश षडक्षरी यः ।
गन्तव्यमाह शरणं च पति पशूनां तस्मै नमो भगवते हरदत्तभूम्ने ॥

मोक्षं ददाति भगवान्परमेश्वरोऽन्ये
मोहात् भ्रमन्ति दिविजाः भवपाशबद्धाः ।
इत्यं प्रमाण सहितं य उपादिदेश
तस्मै नमो भगवते हरदत्त भूम्ने ॥

भस्मत्रिपुण्ड्रविलसद्रमणीय गात्रः रुद्राक्षरत्नमणिमिर्विलसत्सुकण्ठः ।
श्रौताग्निसेवनपरश्शिवपूजको यः तस्मै नमो भगवते हरदत्तभूने ॥

गंभीरसूक्तिनिचयैः श्रुतियुक्तियुक्तः पारम्यमैशममलं पुरतो इरेयः ।
पीठेस्थितोऽनलमये प्रकटी चकार तस्मै नमो भगवते हरदत्तभूने ॥

वन्द्यशिशवोह्यमिनयो भरतोक्तया यत् मौलिस्थहस्तयुगळाञ्जलिमुद्रयाऽस्य ।
इत्यादि युक्तिजटिलं य उदाजहार तस्मै नमो भगवते हरदत्तभूम्ने ॥

तेने हि यो निरुपमां श्रुतिसूक्तिमालां
यां वीक्ष्य जिमतयः सहसा पतन्ति ।
निष्पक्षपातहृदयाः सततं रमन्ते
तस्मै नमो भगवते हरदत्तभूम्ने ॥

हंसोपसेव्यघठनप्रभवाम्बुपूर्ण कंसाभिषे पुरवरेत्वनलेशपूते ।
आविर्बभूव शिवभक्त सुदर्शनो यः तस्मै नमो भगवते हरदत्तभूम्ने ॥

रम्योरसच्युतवती कमलां हरेर्यः श्री सुप्रतीकतनयां पतिमाप्तुकामाम् ।
ज्ञावा सुधी : स्वगृहणीं विधिनोपयेमे तस्मै नमो भगवते हरदत्तभूम्ने ||

दर्प जहार कुधियां शिववैरिणां यः हमें पुपोष सुहृदां शिवमाश्रितानाम् ।
शैवं चकार समयं प्रतिबन्धमुक्तं तस्मै नमो भगवते हरदत्तभूम्ने ||

तापत्रयाग्नि शमनैक सुधाकराय मोहान्धकार हरणैक दिवाकराय |
माहेशबोध जनकाय महामहिम्ने तस्मै नमोस्तु भवते हरदत्तभूम्ने |

यस्यापदानमतुलं विततं भविष्ये भक्तोपमन्युमुनिना द्विजवर्यमध्ये ।
गीतं पुनः शिवरहस्यनवांशके च तस्मै नमोस्तु भवते हरदत्तभूचे ॥

भूमा शिवस्सुकृपया वटमूलवासी ह्यारादुपेत्यपदमाश्रितबालकाय ।
नैजं प्रबोधममृतं प्रददौ च यस्मै तस्मै नमोस्तु भवते हरदत्तभूम्ने |

श्रीकण्ठ दिव्यमहिमावळिबोधिनी या बर्थरनभरिता श्रुतिसूक्तिमाला ।
येनैव सा सुघटिता विदुषाऽसमेन तस्मै नमो भगवते हरदत्तभूम्ने ||

श्री कामकोटिपीठेशकरुणालेशलेशतः ।
अकार्षीदक्षिणामूर्ति : हरदत्तगुरुस्तवम् ॥